This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह E

दाखल क्र. M-2500 विषय संस्कृत काव्य
नाव रामायण आरण्यकांड
लेखक / लिपीकार
पृठ 36 काळ पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2500

॥अरण्यकांड। प्रारंभः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰ आ॰ १ श्रीगणेशाय नमः ॥ श्रीमहादेव उ॰ अथ तत्र दिनं स्थित्वा प्रभाते रघुनंदनः स्ना
१ त्वा मुनिं समामंत्र्य प्रयाणायोपचक्रमे १ मुने गच्छामहे सर्वे मुनिमंडलमंडितं
विपिनं दंडकं यत्र त्वमाज्ञातुमिहार्हसि २ मार्गप्रदर्शनार्थाय शिष्यानाज्ञप्तुम
र्हसि श्रुत्वा रामस्य वचनं प्रहस्यात्रिर्महायशाः ३ सर्वस्य मार्गद्रष्टा त्वं तव को
मार्गदर्शकः तथापि दर्शयिष्यंति तव लोकानुसारिणः ४ इति शिष्यान्समादि
श्य स्वयं किंचित्तमन्वगात् रामेण वारितः प्रीत्या अत्रिः स्वभवनं ययौ ५ क्रोश
मात्रं ततो गत्वा ददर्श महतीं नदीं अत्रेः शिष्यानुवाचेदं रामो राजीवलोचनः
६ नद्याः संतरणे कश्चिदुपायो विद्यते न वा ऊचुस्ते विद्यते नौका सुदृढा रघु १
नंदन ७ तारयिष्यामहे युष्मान्वयमेव क्षणादिह ततो नावि समारोप्य

सीतां राघवलक्ष्मणौ ८ क्षणात्संतारयामासुर्नदीं मुनिकुमारकाः रामाभिनंदि
ताः सर्वे जग्मुस्ते स्वमाश्रमं ९ ततो निविपिनं घोरं झिल्लीझंकारनादितं नानामृ
गगणाकीर्णं सिंहव्याघ्रादिभीषणं १० राक्षसैर्घोररूपैश्च सेवितं रोमहर्षणं
प्रविश्य विपिनं घोरं रामो लक्ष्मणमब्रवीत् ११ इतः परं प्रयत्नेन गंतव्यं सहि
तेन मे धनुर्गुणेन संयोज्य शरानपि करे दधत् १२ अग्रे यास्याम्यहं पश्चात्
त्वमन्वेहि धनुर्धरः आवयोर्मध्यगा सीता मायेवात्मपरात्मनोः १३ रक्षस्त्वा
अपशकुनैः सूचितं रयसर्वत्र दृष्टं रक्षोभयं महत् विद्यते दंडकारण्ये श्रुतं पूर्वमरिंदम १४ इत्येवं
भाषमाणौ तौ जग्मतुः सार्धयोजनं तत्रैका पुष्करिण्यास्ते कल्हारकुमुदोत्पलैः
१५ अंबुजैः शीतलोदेन शोभमाना व्यदृश्यत तत्समीपमथो गत्वा पीत्वा तत्त्स

ऋषिमुखाच्छ्रुतं

=२ रामेणानंदपूर्वं गच्छतेति दत्तानुमतयः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा० अ० ११ लिलंभुमं १६ कुषुस्तेसलिलाभ्याक्षोक्षणं छायामुपाश्रिताः ततोददृशुरायांतंम
हासत्वंभयानकं १७ करालदंष्ट्रावदनंभीषयंतंस्वगर्जितैः वामांसेन्यस्त
२ शूलाग्रग्रथितानेकमानुषं १८ भक्षयंतंगजव्याघ्रमहिषंवनगोचरं ज्यारोपि
तंधनुर्धृत्वारामोलक्ष्मणमब्रवीत् १९ पश्यभ्रातर्महाकायोराक्षसोयमुपा
गतः आयात्यभिमुखंनोग्रोभीरूणांभयमावहन् २० सज्जीकृत्यधनुस्ति
ष्ठमाभैर्जनकनंदिनि इत्युक्त्वाबाणमादायस्थितोरामइवाचलः २१ स
तुदृष्ट्वारमानाथंलक्ष्मणंजानकींतदा अट्टहासंततःकृत्वाभीषयन्निद
मब्रवीत् २२ कौयुवांचापतूणीरजटावल्कलधारिणौ मुनिवेषधरौबा
लौस्त्रीसहायौसुदुर्मदौ २३ सुंदरौवनमेवत्रप्रविष्टकवलोपमौ किम २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थमागतौ घोरं वनं व्यालनिषेवितं २४ श्रुत्वा रक्षोवचो रामः स्मयमान उवा
च तं अहं रामस्त्वयं भ्राता लक्ष्मणो मम संमतः २५ एषा सीता मम प्राणवल्ल
भा वयमागताः पितृवाक्यं पुरस्कृत्य शिक्षणार्थं भवादृशां २६ श्रुत्वा तद्रा
मवचनमट्टहासमथाकरोत् व्यादाय वक्त्रं बाहुभ्यां शूलमादाय सत्वरः
२७ मां न जानासि राम त्वं विराधं लोकविश्रुतं मद्भयान्मुनयः सर्वे त्यक्त्वा
वनमितो गताः २८ यदि जीवितुमिच्छासि त्यक्त्वा सीतां निरायुधौ पलाय
तं न चेच्छीघ्रं भक्षयामि युवामहं २९ इत्युक्त्वा राक्षसः सीतामादातुमभिदुद्रु
वे ३० रामश्चिच्छेद तद्बाहू शरेण प्रहसन्निव ततः क्रोधपरीतात्मा व्यादा
य विकटं मुखं ३१ राममभ्यद्रवद्रामश्चिच्छेद परिधावतः पदद्वयं वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राघस्य तदद्भुतमिवाभवत् ३२ ततः सर्प इवास्येन ग्रसितुं राममापतत्।
ततोर्धचंद्राकारेण बाणेनास्य महच्छिरः ३३ छित्वा तद्रुधिरौघेण पपात
धरणीतले ततः सीतां समालिंग्य प्रशशंस रघूत्तमं ३४ ततो दुंदुभयो
नेदुर्दिवि देवगणेरिताः ननृतुश्चाप्सरो हृष्टा जगुर्गंधर्वकिंनराः ३५
विराधकायाद्‌ऽतिसुंदरात्कृतिर्विभ्राजमानो विमलांबरावृतः प्रतप्त
चामीकरचारुभूषणो व्यदृश्यतानाग्रेगगने रविर्यथा ३६ प्रणम्य रामं प्र
पन्नार्तिहारिणं भवप्रवाहोपरमं घृणाकरं प्रणम्य भूयः प्रणनाम दंड
वत्प्रपन्न सर्वार्तिहरं प्रसन्नधीः ३७ विराध उवाच श्रीराम राजीवद
लायताक्ष विद्याधरोहं विमलप्रकाशः दुर्वाससाऽकारणकोपमूर्त्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाशप्तः पुरा सोद्य विमोचितस्त्वया ३८ इतःपरं त्वच्चरणारविंदयोः
स्मृतिः सदा मे स्तु भवोपशांतये त्वन्नामसंकीर्तनमेव वाणी करोतु मे कर्ण
पुटं त्वदीयं ३९ कथामृतं पातु करद्वयं ते पादारविंदार्चनमेव कुर्यात् शिर
श्च ते पादयुगप्रणामं करोतु नित्यं भवदीयमेव ४० नमस्तुभ्यं भगवते वि
शुद्धज्ञानमूर्तये आत्मारामाय रामाय सीतारामाय वेधसे ४१ प्रपन्नं पा
हि मां राम यास्यामि त्वदनुज्ञया देवलोकं रघुश्रेष्ठ माया मां मावृणोतु ते
४२ इति विज्ञापितस्तेन प्रसन्नो रघुनंदनः ददौ वरं तदा प्रीतो विराधाय म
हामतिः ४३ गच्छ विद्याधराशेषमायादोषगुणाजिताः त्वया मद्दर्शना
त्सद्यो मुक्तो ज्ञानवतां वरः ४४ मद्भक्तिर्दुर्लभा लोके जाता चेन्मुक्तिदा यतः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ सुघोरं रक्षोनिधनं कृतं तस्य शापाद्विमुक्तिः कृता तस्येयं वरदानं च कृतं यतस्तेन विद्याधरत्वमेव पुनर्लब्धं। अतो रामं गृणन्नेति अखिलानर्थान् प्राप्नोतीत्यर्थः।

ए॰आ॰१ अनस्त्वं भक्तिसंपन्नः परं याहि ममाज्ञया ४५ रामेण रक्षोनिधनं सुघोरं शापा
४ द्विमुक्तिर्वरदानमेवं, विद्याधरत्वं पुनरेव लब्धं रामं गृणन्नेति नरो खिलार्था
न् ४६ ॥ इति श्रीमदध्यात्मरामायणे अरण्यकांडे प्रथमः सर्गः १ ॥ ॥
श्रीमहादेव उवाच विराधे स्वर्गते रामो लक्ष्मणेन च सीतया जगाम शरभंग
स्य वनं सर्वसुखावहं १ शरभंगस्तनो दृष्ट्वा रामं सौमित्रिणा सह आयांतं
सीतया सार्धं संभ्रमादुत्थितः सुधीः २ अभिगम्य सुसंपूज्य विष्टरेषूपवेश
यत् आतिथ्यमकरोत्तेषां कंदमूलफलादिभिः ३ प्रीत्याह शरभंगोपि रा
मं न रूपरायणं बहुकालमिहैवासं तपसे कृतनिश्चयः ४ तव संदर्शना ४
कांक्षी राम त्वं परमेश्वरः अद्य मे तपसा सिद्धं यत्पुण्यं बहु विद्यते तत्सर्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तवदास्यामिततोमुक्तिंव्रजाम्यहं ५ समर्प्यरामस्यमहत्सुपुण्यंफलंविरक्तः
शरन्नंगयोगी चितिंसमारोह यदप्रमेयं रामं ससीतंसहसात्रणम्य ६ ध्या
यं चिरं राममशेषहृत्स्थं दूर्वादलश्यामलमंबुजाक्षं चीरांबरं स्निग्धज
टाकलापंसीतासहायंसहलक्ष्मणंतं ७ कोवादयालुःस्मृतकामधेनुर
न्योजगत्यांरघुनायकादहो स्मृतोमयानित्यमनन्यभाजाज्ञात्वास्मृतिंमेस्व
यमेवयातः ८ पश्यन्निदानींदिवेन्द्रोरामोदाशरथिःप्रभुः दग्ध्वास्वदेहंगच्छा
मिब्रह्मलोकमकल्मषः ९ अयोध्याधिपतिर्मेस्तुहृदयेराघवः सदा यद्वा
मांकेस्थितासीतामेघस्येवतडिल्लता १० इतिरामंचिरंध्यात्वादृष्ट्वाचपुरतः
स्थितं प्रज्वाल्यसहसावन्हिंदग्ध्वापंचात्मकेवपुः ११ दिव्यदेहधरः सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰ आ॰ २ ख्याप्ययौलोकपतेःपदं ततोमुनिगणाःसर्वेदंडकारण्यवासिनः १२ आजग्मूराघ
५ वंद्रष्टुंशरभंगनिवेशनं दृष्ट्वामुनिसमूहंतंजानकीरामलक्ष्मणाः प्रणेमुः
सहसाभूमौमायामानुषरूपिणः १३ आशीर्भिरभिनंद्याथरामंसर्वेहृदिस्थितं
तं ऊचुःप्रांजलयःसर्वेधनुर्बाणधरंहरिं १४ भूमेर्भारावतारायजातोसिब्रह्म
णार्थितः जानीमस्त्वांहरिंलक्ष्मींजानकींलक्ष्मणंतथा १५ शेषांशंशंखचक्रे
द्वैभरतंसानुजंतथा अतश्चादैऋषीणांत्वंदुःखंमोक्तुमिहार्हसि १६ आग
च्छयामोमुनिसेवितानिवनानिसर्वाण्यिरघूत्तमक्रमात् द्रष्टुंसुमित्रासुतजान
कीभ्यांतदादयास्मासुदृढाभविष्यति १७ इतिविज्ञापितोरामःकृतांजलिपुटै ५
र्विभुः जगाममुनिभिःसार्धंद्रष्टुंमुनिवनानिसः १८ ददर्शतत्रपतितान्यने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कानि शिरांसि सः अस्थिभूतानि सर्वत्र रामो वचनमब्रवीत् १९ अस्थीनि के
षामेतानि किमर्थं पतितानि वै तमूचुर्मुनयो राम ऋषीणां मस्तकानि हि २०
राक्षसैर्भक्षितानीश प्रमत्तानां समाधितः अंतरायं मुनीनां ते पश्यंतोऽनुच
रंति हि २१ श्रुत्वा वाक्यं मुनीनां स भयदैन्यसमन्वितं प्रतिज्ञामकरोद्रामो वधा
याशेषरक्षसां २२ पूज्यमानः सदा तत्र मुनिभिर्वनवासिभिः जानक्या सहि
तो रामो लक्ष्मणेन समन्वितः २३ उवास कतिचित्तत्र वर्षाणि रघुनंदनः एवं
क्रमेण संपश्यन् ऋषीणामाश्रमान् विभुः २४ सुतीक्ष्णस्याश्रमं प्रागात्प्र
ख्यातमृषिसंकुलं सर्वर्त्तुगुणसंपन्नं सर्वकालसुखावहं २५ राममागतमा
कर्ण्य सुतीक्ष्णः स्वयमागतः अगस्तिशिष्यो रामस्य मंत्रोपासनतत्परः वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰आ॰२ धिवत्पूजयामास भक्त्युत्कंठितलोचनः २६ सुतीक्ष्ण उ॰ त्वन्मंत्रजाप्यहमनंतगु
६ णाप्रमेय सीतापते शिवविरंचिसमाश्रितांघ्रे संसारसिंधुतरणामलपोतपाद रामा
भिराम सततं तव दासदासः २७ मेमोद्य सर्वजगतामविगोचरस्त्वं त्वन्मायया
सुतकलत्रगृहांधकूपे मग्नं निरीक्ष्य मलमुद्गलपिंडमोहपाशानुबद्धहृदयं स्वय
मागतोसि २८ त्वं सर्वभूतहृदयेषु कृतालयोपि त्वन्मंत्रजाप्यविमुखेषु तनोषि
मायां त्वन्मंत्रसाधनपरेष्वपयाति मायासेवानुरूपफलदोसि यथा महीपः २९
विश्वस्य सृष्टिलयसंस्थितिहेतुरेकस्त्वं मायया त्रिगुणया विधिरीशविष्णुः भासी
श मोहितधियां विविधाकृतिस्त्वं यद्वद्रविः सलिलपात्रगतो ह्यनेकः ३० प्रत्यक्षतो ६
द्य भवतश्चरणारविंदं पश्यामि राम तमसः परतः स्थितस्य दृक्रूपतस्त्वमस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तामविगोचरोपित्वन्मंत्रपूतहृदयेषुसदाप्रसन्नः ३१ पश्यामिरामतवरूपम
रूपिणोपिमायाविडंबनकृतंसुमनुष्यवेषं कंदर्पकोटिसुभगंकमनीयचापबाणं
दयार्द्रहृदयंस्मितचारुवक्त्रं ३२ सीतासमेतमजिनांबरमप्रधृष्यंसौमित्रिणा।
नियतसेवितपादपद्मं नीलोत्पलद्युतिमनंतगुणंप्रशांतं मद्भागधेयमनिशंप्र
णमामिरामं ३३ जानंतुरामतवरूपमशेषदेशकालाद्युपाधिरहितंघनचित्प्रका
शं प्रत्यक्षतोद्यममगोचरमेतदेवरूपंविभातुहृदयेनपरंविकांक्षे ३४ इत्येवंस्तुवत
स्तस्यरामःसस्मितमब्रवीत् मुनेजानामितेचित्तंनिर्मलंमदुपासनात् ३५ अतोह
मागतोद्रष्टुंमदृतेनान्यसाधनं मन्मंत्रोपासकालोकेमामेवशरणंगताः ३६ निर
पेक्षानान्यगतास्तेषांदृश्योहमन्वहं स्तोत्रमेतत्पठेद्यस्तुत्वत्कृतंमत्प्रियंसदा ३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा० आ० २ सद्भक्तिर्मे भवेन्नस्य ज्ञाने च विमले भवेत् त्वं ममोपासनादेव विमुक्तोसीह स
७ र्वतः ३९ देहांते मम सायुज्यं लप्स्यसे नात्र संशयः गुरुं ते द्रष्टुमिच्छामि ह्यगस्त्यं मु
निनायकं किंचित्कालं तत्रैव स्तुं मनो मे त्वरयत्यलं ३९ सुतीक्ष्णोपि तथेत्याह श्वो
गमिष्यसि राघव अहमप्यागमिष्यामि चिराद्द्रष्टुं महामुनिः ४० अथ प्रभाते मु
निना समेतो रामः ससीतः सह लक्ष्मणेन अगस्त्यसंभाषणलोलमानसः शनै
रगस्त्यानुजमंदिरं ययौ ४१ इति श्रीमदध्यात्मरामायणे अरण्यकांडे द्वितीयसर्गः २
श्रीमहादेव उवाच अथ रामः सुतीक्ष्णेन जानक्या लक्ष्मणेन च अगस्त्यस्यानुज
स्थानं मध्याह्ने समपद्यत १ तेन संपूजितः सम्यक् भुक्त्वा मूलफलादिकं परेद्युः ७
प्रातरुत्थाय जग्मुस्तेगस्त्यमंडलं २ सर्वर्तुफलपुष्पाढ्यं नानामृगगणैर्युतं प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षिसंघैश्चविविधैर्नादितंनंदनोपमं ३ ब्रह्मर्षिभिर्देवर्षिभिःसेवितंमुनिमंदिरैः
सर्वतोलंकृतंसाक्षाद्ब्रह्मलोकमिवापरं ४ बहिरेवाश्रमस्याथस्थित्वारामोब्रवी
न्मुनिं सुतीक्ष्णगछत्वंशीघ्रमागतंमांनिवेदय ५ अगस्त्यमुनिवर्योयसीतयाल
क्ष्मणेनच महाप्रसादइत्युक्त्वासुतीक्ष्णःप्रययौगुरोः ६ आश्रमंत्वरयातत्रऋ
षिसंघसमावृतं उपविष्टंरामभक्तैर्विशेषेणसमायुतं ७ व्याख्यातराममंत्रा
र्थंशिष्येभ्यश्चातिभक्तितः दृष्ट्वागस्त्यंमुनिश्रेष्ठंसुतीक्ष्णःप्रययौमुनिः ८ दंडव
त्प्रणिपत्याहविनयावनतःसुधीः रामोदाशरथिर्ब्रह्मन्सीतयालक्ष्मणेनच आ
गतोदर्शनार्थंतेबहिस्तिष्ठतिसांजलिः ९ अगस्त्यउ॰ शीघ्रमानयभद्रंतेरामंम
मद्धृदिस्थितं तमेवध्यायमानोहंकांक्षमाणोत्रसंस्थितः १० इत्युक्त्वास्वयमु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ सुखोपविष्टं संपूज्य पूजया बहुविस्तरं भोजयित्वा यथान्यायं भोज्यैर्वन्यैरनेकधा १०
रा॰ आ॰ ०२ स्थायमुनिभिः सहितो द्रुतं अभ्ययात्त्वरया भक्त्या गत्वा राममथाब्रवीत् ११ आ
८ गच्छ राम भद्रं ते दिष्ट्या तेद्य समागमः प्रियातिथिर्मम प्राप्तोऽस्यद्य मे सफलं दि
नं १२ रामोपि मुनिमायांतं दृष्ट्वा हर्षसमाकुलः सीतया लक्ष्मणेनापि दंडवत्प
तितो भुवि १३ द्रुतमुत्थाप्य मुनिराट् राममालिंग्य भक्तितः तद्गात्रस्पर्शजा
ल्हादस्रवन्नेत्रजलाकुलः १४ गृहीत्वा करमेकेन करेण रघुनंदनं जगाम स्वा
श्रमं हृष्टो मनसा मुनिपुंगवः १५ सुखोपविष्टमेकांते रामं शशिनिभाननं
कृतांजलिरुवाचेदमगस्त्यो भगवानृषिः १६ त्वदागमनमेवाहं प्रतीक्षन्सम
वस्थितः यदा क्षीरसमुद्रांते ब्रह्मणा प्रार्थितः पुरा १७ भूमेर्भारापनुत्त ८
ये रावणस्य वधाय च तदादि दर्शनाकांक्षी तव राम तपश्चरन् वसामि मु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ प्राणाद्यात्मकं हि द्व्यष्टाविंशतिरूपं । लिंगं सर्वकार्यक्षमत्वात्
सर्वसूक्ष्मत्वसमष्टित्वात् ।

निभिः सार्धं त्वामेव परिचिंतयन् १८ स्रष्टेः प्रागेक एवासीर्निर्विकल्पोनुपाधिकः
त्वदाश्रया त्वद्विषया मायाते शक्तिरुच्यते १९ त्वामेव निर्गुणं शक्तिरावृणोति यदा
तदा अव्याकृतमिति प्राहुर्वेदांतपरिनिष्ठिताः २० मूलप्रकृतिरित्येके प्रा
हुर्मायेति केचन अविद्यासंसृतिर्बंध इत्यादि बहुधोच्यते २१ त्वया संक्षोभ्य
माणा सा महत्तत्वं प्रसूयते महत्तत्वादहंकार स्त्वया संचोदितादभूत् २२ अ
हंकारो महत्तत्वसंवृतस्त्रिविधोऽभवत् सात्विको राजसश्चैव तामसश्चेति
भण्यते २३ तामसात्सूक्ष्मतन्मात्राण्यासन्नूतान्यतः परम् स्थूलानि क्र
मशो राम क्रमोत्तरगुणानि हि २४ राजसानींद्रियाण्येव सात्विकादेवनामनः
तेभ्योभवत्सूत्ररूपं लिंगं सर्वगतं महत् २५ ततो विराट्समुत्पन्नः स्थूलाद्भूत

३ शब्दस्पर्शरूपरसगंधतन्मात्राणि सूक्ष्मतन्मात्रेभ्यः

२ क्रमेणाधिकगुणानि । आकाशं शब्दमात्रगुणं । वायुः शब्दस्पर्शगुणः इत्येवं प्रकारेणाधिकगुणत्वं अन्येष्वपि बोध्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२कालक्रमेणयथाहेमंतेग्रीष्मयोचसंतेयथादि कर्मक्रमेणकालसहकृतेनतिर्यङ्मनुष्यदेवत्वप्राप्तिः।
२सर्वस्यजगतः कारणमित्यर्थः।आर्षत्वात्समासः

रा०आ०९२ कदंबकात् विराजः पुरुषात्सर्वंजगत्स्थावरजंगमं २६ देवतिर्यङ्मनुष्याश्च
१ कालकर्मक्रमेणतु त्वंरजोगुणतोब्रह्माजगतःसर्वकारणम् २७ सत्वाद्वि
ष्णुस्त्वमेवास्यपालकःसद्भिरुच्यते लयेरुद्रस्त्वमेवास्यत्वन्मायागुणभेदतः२८
जाग्रत्स्वप्नसुषुप्त्याख्यावृत्तयोबुद्धिजागुणैः तासांविलक्षणोरामत्वंसाक्षी
चिन्मयोव्ययः २९ सृष्टिलीलांयदाकर्त्तुमीहसेरघुनंदन अंगीकरोषिमायां
त्वंतदावैगुणवानिव ३० राममायाद्विधाभातिविद्याऽविद्येतितेसदा प्रव
त्तिमार्गनिरताअविद्यावशवर्त्तिनः ३१ निवृत्तिमार्गनिरतावेदांतार्थविचा
रकाः ३१ त्वद्भक्तिनिरतायेचतेवैविद्यामयाःस्मृताः अविद्यावशगायेतु १
नित्यसंसारिणश्चते ३२ विद्याभ्यासरतायेतुनित्यमुक्तास्तएवहि लोके

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वद्भक्तिनिरतास्त्वन्मंत्रोपासकाश्चये विद्याप्रादुर्भवेत्तेषांनेतरेषांकदाचन
३३ अतस्त्वद्भक्तिसंपन्नामुक्ताएवनसंशयः त्वद्भक्त्यमृतहीनानांमोक्षः स्व
प्नेपिनोभवेत् ३४ किंरामबहुनोक्तेनसारंकिंचिद्ब्रवीमिते साधुसंगतिरेवा
त्रमोक्षहेतुरुदाहृता ३५ साधवःसमचित्तायेनिस्पृहाविगतैषिणः दां
ताःप्रशांतास्त्वद्भक्तानिवृत्ताऽखिलकामनाः ३६ इष्टप्राप्तिविपत्योश्चसमाः
संगविवर्जिताः सन्यस्ताखिलकर्माणःसर्वदाब्रह्मतत्पराः ३७ यमा
दिगुणसंपन्नाःसंतुष्टायेनकेनचित् तत्संगमोभवेद्यर्हित्वत्कथाश्रवणेर
तिः ३८ समुदेतिततोभक्तिस्त्वयिरामसनातने त्वद्भक्तावुपपन्नायांवि
ज्ञानंविपुलंस्फुटं ३९ उदेतिमुक्तिमार्गोयमाद्यश्चतुरसेवितः तस्माद्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰ आ॰ ८३ घव सद्भक्तिस्त्वयि मे प्रेमलक्षणा ४० सदा भूयाद्धरे संगस्त्वद्भक्तेषु विशेषतः
१० अद्य मे सफलं जन्म भवत्संदर्शनादभूत् ४१ अद्य मे क्रतवः सर्वे बभूवुः सफ
लाः प्रभो ४२ दीर्घकालं मया तप्तमनन्यमतिना तपः तस्येह तपसो राम फलं तव
पदार्चनं ४३ सदा मे सीतया सार्धं हृदये वस राघव गच्छतस्तिष्ठतो वापि स्मृ
तिः स्यान्मे सदा त्वयि ४४ इति स्तुत्वा रमानाथमगस्त्यो मुनिसत्तमः ददौ चापं
महेंद्रेण रामार्थे स्थापितं पुरा ४५ अक्षय्यौ बाणतूणीरौ खड्गौ रत्नविभूषि
तः जहि राघव भूभारभूतं राक्षसमंडलं ४६ यदर्थं भवतीर्णोसि मायया मा
नुषाकृतिः इतो योजनयुग्मे तु पुण्यकाननमंडितः ४७ अस्ति पंचवटीना
म्ना आश्रमो गौतमीतटे नेतव्यस्तत्र ते कालः शेषो रघुकुलोद्वह तत्रैव बहु १०
त्वया शेषः कालो नेय इत्यर्थः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कार्याणिदेवानांकुरुसत्यते ४८ श्रुत्वातदागस्त्यसुभाषितंवचस्तोत्रंचतत्वार्थसमन्वितंविभुः मुनिंसमाभाष्यमुदान्वितोयथौप्रदर्शितेमार्गमत्रेषवि
द्भुरिः ४९ ॥इतिश्रीमदध्यात्मरामायणेतृतीयःसर्गः ३ श्रीमहादेवउवाः
मार्गेव्रजन्ददर्शाथशैलश्रृंगमिवस्थितं स्तद्वंजटायुषंरामःकिमेतदिति
विस्मितः १ धनुरानयसौमित्रेराक्षसोयंपुरःस्थितः इत्याहलक्ष्मणं
रामोहनिष्याम्यृषिभक्षकं २ तछ्रुत्वारामवचनंगृध्रराट्भयपीडितः ३
वधार्होहंनतेरामपितुस्तेहंप्रियःसखा जटायुर्नोमभद्रंतेगृध्रोहंप्रियकृत्तव
४ पंचवट्यामहंवत्स्यतवैवप्रियकाम्यया मृगयायांकदाचित्तुप्रयातेलक्ष्म
णेपित्व ५ सीताजनककन्यामेरक्षितव्याप्रयत्नतः श्रुत्वातद्गृध्रवचनंरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰ आ॰ ४ मःसस्नेहमब्रवीत् ६ साधुराघवमहाराजतथैवकुरुमेप्रियं अत्रैवमेसमीप
११ स्थोनातिदूरेवनेवसन् ७ इत्यामंत्रितमालिंग्ययथौपंचवटींप्रभुः लक्ष्मणे
नसहभ्रात्रासीतयारघुनंदनः ८ गत्वातेगौतमीतीरेपंचवट्यांसुविस्तरं
मंदिरंकारयामासलक्ष्मणेनसुबुद्धिना ९ तत्रतेन्यवसन्सर्वेगंगायाउत्तरे
तटे कदंबपनसाम्रादिफलवृक्षसमाकुले १० विविक्तेजनसंबाधवर्जितेनि
र्जनस्थले विनोदयन्जनकजांलक्ष्मणेनविपश्चिता ११ अध्यवासत्सुखंरा
मोदेवलोकइवामरः कंदमूलफलादीनिलक्ष्मणोनुदिनंतयोः १२ आनीय
प्रददौरामसेवातत्परमानसः धनुर्बाणधरोनित्यंरात्रौजागर्तिसर्वतः १३ ११
स्नानंकुर्वंत्यनुदिनंत्रयस्तेगौतमीजले उभयोर्मध्यगासीताकुर्वंतेचगमाग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मौ १४ आनीयसलिलं नित्यंलक्ष्मणःप्रीतमानसः सेवतेऽहरहःप्रीत्याएव
मासन्सुखंन्नृपः १५ एकदालक्ष्मणोराममेकांतेसमुपस्थितं विनयावन
रा तोभूत्वापप्रच्छपरमेश्वरं १६ त्वत्तःश्रोतुमिच्छामिमोक्षस्यैकांतिकींगतिं
त्वत्तःकमलपत्राक्षसंक्षेपाद्वक्तुमर्हसि १७ ज्ञानंविज्ञानसहितंभक्तिवै
राग्यबृंहितं आचक्ष्वमेरघुश्रेष्ठवक्तानान्योस्तिभूतले १८ श्रीरामउः
शृणुवक्ष्यामितेवत्सगुह्याद्गुह्यतरंपरं यद्विज्ञायनरोजह्यात्सद्योवैका
ल्पिकंभ्रमं १९ आदौमायास्वरूपंतेवक्ष्यामितदनंतरं ज्ञानस्यसाधनं
पश्चात्ज्ञानंविज्ञानसंयुतं २० ज्ञेयंचपरमात्मानंयज्ज्ञात्वामुच्यतेभया
त् अनात्मनिशरीरादावात्मबुद्धिस्तुयाभवेत् २२ सैवमायातयैवासौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰ आ॰ ॰४ संसारः परिकल्प्यते रूपेद्दैनिश्चितेपूर्वैमायायाः कुलनंदन २३ विक्षेपावरणेनत्त
१२ त्रप्रथमंकल्पयेज्जगत् लिंगाद्यब्रह्मपर्यंतंस्थूलसूक्ष्मविभेदतः २४ अपरंत्व
खिलंज्ञानरूपमावृत्यतिष्ठति मायपाकल्पितंविश्वंपरमात्मनिकेवले २५ र
ज्जौभुजंगवद्भ्रांत्याविचारेनास्तिकिंचन श्रूयतेदृश्यतेयद्यत्स्मर्यतेवानरैः सदा २६
असदेवहितत्सर्वंयथास्वप्नमनोरथौ देहएवहिसंसाररक्षमूलंदृढंस्मृतं २७
तन्मूलःपुत्रदारादिबंधःकिंतेन्यथात्मनः देहस्तुस्थूलभूतानि पंचतन्मात्रपंचकं
अहंकारश्चबुद्धिश्चइंद्रियाणितथादश २८ चिदाभासोमनश्चैवमूलप्रकृतिरे
वच एतत्सेत्रमितिज्ञेयंदेहइत्यभिधीयते २९ एतैर्विलक्षणोजीवःपरमात्मानि
रामयः तस्यजीवस्यविज्ञानेसाधनान्यपिमेशृणु ३० जीवश्चपरमात्माच १२

॥२७ अन्यथा। देहाभावे। तेपुत्रादयः आत्मनः किं न किमपीत्यर्थः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पर्यायोनात्रभेदधीः मानाभावस्तथादंभहिंसादिपरिवर्जनं ३१ पराक्षेपादिसहनं
सर्वत्रावक्रतातथा मनोवाक्कायसद्भक्त्यासद्गुरोः परिसेवनं ३२ बाह्याभ्यंतरसं
शुद्धिःस्थिरतासत्क्रियादिषु मनोवाक्कायदंडश्च विषयेषुनिरीहता ३३ निर
हंकारताजन्मजराद्यालोचनंतथा असक्तिःस्नेहशून्यत्वंपुत्रदारधनादि
षु ३४ इष्टानिष्टागमेनित्यंचित्तस्यसमतातथा मयिसर्वात्मकेरामेह्यन
न्यविषयामतिः ३५ जनसंबाधरहितशुद्धदेशनिषेवणं प्राकृतैर्जनसं
घेश्चह्यरतिःसर्वदाभवेत् ३६ आत्मज्ञानेसदोद्योगोवेदांतार्थावलोकनं
उक्तैरेतैर्भवेज्ज्ञानंविपरीतैर्विपर्ययः ३७ बुद्धिप्राणमनोदेहाहंकृति
भ्योविलक्षणः चिदात्माहंनित्यशुद्धोबुद्धएवेतिनिश्चयं ३८ येनज्ञाने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विते न०ज्ञानमितिमेनिश्चितंनिश्चयः

रा०आ०४ नसंवित्तिनज्ञानंनिश्चितंचमे विज्ञानंचतदैवैतत्साक्षादनुभवेद्यदा ४९
१२ आत्मासर्वत्रपूर्णःस्याच्चिदानंदात्मकोऽव्ययः बुध्याद्युपाधिरहितःपरि
णामादिवर्जितः ५० स्वप्रकाशेनदेहादीन्भासयन्ननपावृतः एकएवाद्विती
यश्चसत्यज्ञानादिलक्षणः ५१ असंगःस्वप्रभोद्रष्टाविज्ञानेनावगम्यते
आचार्यशास्त्रोपदेशादैक्यज्ञानंयदाभवेत् ५२ आत्मनोर्जीवपरयोर्मूला
विद्यातदैवहि लीयतेकार्यकरणैःसहैवपरमात्मनि ५३ सावस्थामुक्तिरित्यु
क्ताह्युपचारोयमात्मनि इदंमोक्षस्वरूपंतेकथितंरघुनंदन ५४ ज्ञानवि
ज्ञानवैराग्यसहितंमेपरात्मनः किंत्वेतद्दुर्लभंमन्येमद्भक्तिविमुखात्मनां ५५ १२
चक्षुष्मतामपियथारात्रौसम्यङ्नदृश्यते पदंदीपसमेतानांदृश्यतेसम्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गेवहि ४६ एवंमद्भक्तियुक्तानामात्मासम्यक्प्रकाशते मद्भक्तेः कारणंकिंचि
द्वक्ष्यामिशृणुतत्वतः ४७ मद्भक्तसंगोमेसेवामद्भक्तानांनिरंतरं एकादश्यु
पवासादिममपर्वानुमोदनं ४८ मत्कथाश्रवणेपाठेव्याख्यानेसर्वदारतिः
मत्पूजापरिनिष्ठाचममनामानुकीर्त्तनं ४९ एवंसततयुक्तानांभक्तिरव्यभि
चारिणी मयिसंजायतेनित्यंततःकिमवशिष्यते ५० अतोमद्भक्तियुक्तस्य
ज्ञानंविज्ञानमेवच वैराग्यंचभवेच्छीघ्रंततोमुक्तिमवाप्नुयात् ५१ कथितंस
र्वमेतत्तेतवप्रश्नानुसारतः अस्मिन्मनःसमाधाययस्तिष्ठेत्सतुमुक्तिभाक्
५२ नवक्तव्यमिदंयत्नान्मद्भक्तिविमुखायहि मद्भक्तायप्रदातव्यमाहूयापि
प्रयत्नतः ५३ यइदंतुपठेन्नित्यंश्रद्धाभक्तिसमन्वितः अज्ञानपटलध्वांत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा० आ०४

विधूयपरिमुच्यते ५४ भक्तानांममयोगिनांसुविमलस्वांतातिशांतात्मनां

१५ मत्सेतावनिरतात्मनांचविमलज्ञानात्मनांसर्वदा संगंयःकुरुतेसदोद्यतमतिः

सतांसेवनेनानन्य धीस्तत्सनद्दृस्यर्थः। तत्सेवनानन्यधीर्मोक्षस्तस्यकरेस्थितोऽहमनिशंदृश्योभवेनान्यथा ५५

॥इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेअरण्यकांडेचतुर्थःसर्गः ४

॥श्रीमहादेवउ० तस्मिन्कालेमहारण्येराक्षसीकामरूपिणी विचचारमहास

त्वाजनस्थाननिवासिनी १ एकदागौतमीतीरेपंचवट्याःसमीपतः पद्मव

ज्रांकुशांकानिपदानिजगतीपतेः २ दृष्ट्वाकामपरीतात्मापादसौंदर्यमोहि

ता पश्यंतीसाशनैरायाद्राघवस्यनिकेतनं ३ तत्रसातंरमानाथंसीतया १५

सहसंस्थितं कंदर्पसदृशंरामंदृष्ट्वाकामविमोहिता ४ राक्षसीराघवंप्राह

=२ तत्रेरामनिकेतने सा राक्षसी २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कस्यत्वंकः किमाश्रमे युक्तोजटावल्कलधारिभिः साध्यंकिंतत्रमेवद ५ अहंशूर्प

णखानामराक्षसीकामरूपिणी भगिनीराक्षसेंद्रस्यरावणस्यमहात्मनः ६

खरेणसहितात्रात्रावसाम्यत्रैवकानने राज्ञादत्तंचमेसर्वंमुनिभक्षावसाम्य

हं ७ त्वांतुवेदितुमिच्छामिवदमेवदतांवर तामाहरामनामाहमयोध्याधिपतेः

सुतः ८ एषामेसुंदरीभार्यासीताजनकनंदिनी सतुभ्रातकनीयान्मेलक्ष्मणोति

वसुंदरः ९ किंकृत्यंतेमयाब्रूहिकार्यंभुवनसुंदरि इतिरामवचःश्रुत्वाकामा

र्त्तासाब्रवीदिदं १० एहिराममयासार्धंरमस्वगिरिकानने कामार्त्ताहंनशक्नो

मित्यक्तुंत्वांकमलेक्षण ११ रामःसीतांकटाक्षेणपश्यन्सस्मितमब्रवीत् भा

र्यामममेषाकल्याणीविद्यतेह्यनपायिनी १२ त्वंतुसापत्न्यदुःखेनकथंस्थास्यसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ए० आ० ५ सुंदरि बहिरास्तेमम भ्रातालक्ष्मणोतीवसुंदरः १३ तवानुरूपो भवितापतिस्तेनैवसं
१५ चर इत्युक्तालक्ष्मणंप्राहपतिर्मे भवसुंदर १४ भ्रातुराज्ञांपुरस्कृत्यसंगच्छावोद्य
माचिरं इत्याहराक्षसीघोरालक्ष्मणंकाममोहिता १५ तामाहलक्ष्मणः साध्वि
दासोहंतस्यधीमतः दासीभविष्यसित्वंतु ततोदुःखतरंनुकिम् १६ तमेवगच्छभ
द्रंतेसतुराजाखिलेश्वरः तच्छ्रुत्वापुनरप्यागाद्राघवंदुष्टमानसा १७ क्रोधाद्रा
मकिमर्थंमांभ्रामयस्यनवस्थितः इदानीमेवतांसीतांभक्षयामितवाग्रतः १८
इत्युक्त्वाविकटाकाराजानकीमनुधावति ततोरामाज्ञयाखड्गमादायपरिगृह्य
तां १९ चिच्छेदकर्णौनासांचलक्ष्मणोलघुविक्रमः ततोघोरध्वनिंकृत्वारुधि १५
राक्तवपुर्द्रुतं २० क्रंदमानापपाताग्रेखरस्यपरुषाक्षरा किमेतदितितामाह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खरः खरतराक्षरः २१ केनैवं कारिनासित्वं मत्योर्वक्रानुवर्त्तिना वदमेतं व
धिष्यामि कालकल्पमपि क्षणात् २२ नमाह राक्षसी रामः सीतालक्ष्मणसंयु
तः दंडकं निर्भयं कुर्वन्भास्ते गोदावरी तटे २३ मामेवं रूतवांस्तस्य भ्राता तेनैनैव
चोदितः यदित्वं कुलजातोसि वीरोसि जहि तौ रिपू २४ तयोस्तु रुधिरं पास्ये भ
क्षयेतो सुदुर्मदौ नोचेत्प्राणान्परित्यज्य यास्याम्ययमसादनं २५ तच्छ्रुत्वा त्वरितं
प्रागात्खरः क्रोधेन मूर्छितः चतुर्दशसहस्राणि रक्षसां भीमकर्मणां २६ चो
दयामास रामस्य समीपं वधकांक्षया खरश्च त्रिशिराश्चैव दूषणश्चैव राक्षसः
२७ सर्वे रामं ययुः शीघ्रं नानाप्रहरणोद्यताः श्रुत्वा कोलाहलं तेषां रामः सौमि
त्रिमब्रवीत् २८ श्रूयते विपुलः शब्दो नूनमायांति राक्षसाः भविष्यति महद्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वंनूनमद्यमयासह २९ सीतांनीत्वागुहांगत्वातत्रतिष्ठमहाबल हंतुमिच्छाम्यहंस
र्वान्नूराक्षसान्घोररूपिणः ३० अत्रकिंचिन्नवक्तव्यंशापितोसिममोपरि तथेतिसी
तामादायलक्ष्मणोगव्हरंययौ ३१ रामःपरिकरंबध्वाधनुरादायनिष्ठुरं तूणीर
वक्षयत्रारोबध्वायत्तोभवद्विभुः ३२ ततआगत्यरक्षांसिरामस्योपरिचिक्षिपुः आ
युधानिविचित्राणिपाषाणान्पादपानपि ३३ तानिचिच्छेदरामोपिलीलयानिंत्रशः
क्षणात् ततोबाणसहस्रेणहत्वातान्सर्वराक्षसान् ३४ खरंत्रिशिरसंचैवदूषणं
चैवराक्षसं जघानप्रहरार्धेनसर्वानेवरघूत्तमः ३५ लक्ष्मणोपिगुहामध्यात्सी
तामादायराघवे समर्प्यराक्षसान्दृष्ट्वा हतान्विस्मयमाययौ ३६ सीतारामंसमालिं
गप्रसन्नमुखपंकजं शस्त्रव्रणानिचांगेषुममार्जजनकात्मजा ३७ सापिदृष्ट्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वदृष्ट्वा तान्हतान्राक्षसपुंगवान् लंकां गत्वा सभामध्ये क्रोशंती पादसंनिधौ ३८
रावणस्य पपातोर्व्यां भगिनी तस्य रक्षसः दृष्ट्वा तां रावणः प्राह भगिनीं नयविह्
लां ३९ उत्तिष्ठोत्तिष्ठ वत्से त्वं विरूपकरणं तव कृतं शक्रेण वा नद्रेयमेन वरुणेन वा
४० कुबेरेणाथवा ब्रूहि भस्मीकुर्यां क्षणेन तं राक्षसीतमुवाचेदं त्वं प्रमत्तो विमूढ
धीः ४१ पानासक्तः स्त्रीविजितः षंढः सर्वत्र लक्ष्यसे चारचक्षुर्विहीनस्त्वं कथं राजा
भविष्यसि ४२ खरश्च निहतः संख्ये दूषणस्त्रिशिरास्तथा चतुर्दशसहस्राणि रा
क्षसानां महात्मनां ४३ निहतानि क्षणेनैव रामेणाऽसुरशत्रुणा जनस्थानम
शेषेण मुनीनां निर्भयं कृतं ४४ न जानासि विमूढस्त्वं मत्त एवं मयोच्यते ४५
रावणउवाच॥ को वा रामः किमर्थं वा कथं तेनासुरा हताः सम्यक् कथय मे तेषां मूल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰आ॰५
१७

घातं करोम्यहं ४५ शूर्पणखोवाच जनस्थानादहं याता कदाचिद्गौतमीतटे तत्र
पंचवटीनाम पुण्यमुनिजनाश्रया ४६ तत्राश्रमे मया दृष्टो रामो राजीवलोचनः
धनुर्बाणधरः श्रीमान्जटावल्कलमंडितः ४७ कनीयाननुजस्तस्य लक्ष्मणो
पि तथाविधः तस्य भार्या विशालाक्षी रूपिणी श्रीरिवापरा ४८ देवगंधर्वनागा
नां मनुष्याणां तथाविधा न दृष्टा न श्रुता राजन्द्योतयंती वनं शुभा ४९ आनेतु
महमुद्युक्ता तां भार्यार्थं तवानघ लक्ष्मणो नाम तद्भ्राता चिच्छेद मम नासिकां ५०
कर्णौ च चोदितस्तेन रामेण स महाबलः ततोहमति दुःखेन रुदंती खरमन्वगां
५१ सोपि रामं समासाद्य युद्धं राक्षसयूथपैः ततः क्षणेन रामेण तेनैव बलशा १७
लिना ५२ सर्व एव विनष्टा वै राक्षसा भीमविक्रमाः यदि रामो मनः कुर्यात्त्रै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकं निमिषार्धतः ५३ भस्मीकुर्यान्न संदेह इति भाति मम प्रभो यदि सा तव
भार्या स्यात्सफलं तव जीवितं ५४ अतो यतस्व राजेंद्र यथा ते वल्लभा भवेत् सीता
राजीवपत्राक्षी सर्वलोकैकसुंदरी ५५ साक्षाद्रामस्य पुरतः स्थातुं त्वं न क्षमः प्र
भो मायया मोहयित्वा तु प्राप्स्यसे तां रघूत्तमं ५६ श्रुत्वा तत्सूक्तवाक्यैश्च दानमा
नादिभिस्तथा आश्वास्य भगिनीं राजा प्रविवेश स्वकं गृहं तत्र चिंतापरो भूत्वा नि
द्रां रात्रौ न लब्धवान् ५७ एकेन रामेण कथं मनुष्यमात्रेण नष्टः सबलः खरो मे
भ्राता कथं मे बलवीर्यदर्पयुतो विनष्टो बत राघवेण ५८ यद्वा न रामो मनुजः प
रेशो मां हंतु कामः सबलं बलौघैः संप्रार्थितो यं द्रुहिणेन पूर्वं मनुष्यरूपोद्य रघोः
कुले ऽभूत् ५९ वध्यो यदि स्यां परमात्मनाहं वैकुंठराज्यं परिपालयेहं नो चेदिदं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राक्षसराज्यमेव भोक्ष्ये चिरं राम मतो व्रजामि ६० इत्थं विचिंत्याखिलराक्षसेंद्रो रामं

विदित्वा परमेश्वरं हरिं विरोधबुध्यैव हरिं प्रयामि द्रुतं न भक्त्या भगवान्प्रसीदेत्
६१ ॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे अरण्यकांडे पंचमः सर्गः
५ ॥ श्रीमहादेव उवाच विचिंत्यैवं निशायां स प्रभाते रथमास्थितः रावणो मन
सा कार्यमेकं निश्चित्य बुद्धिमान् १ ययौ मारीचसदनं परं पारमुदन्वतः मारीच
स्तत्र मुनिवज्जटावल्कलधारकः २ ध्यायन्हृदि परात्मानं निर्गुणं गुणभासकं
समाधिविरमे ऽपश्यद्रावणं गृहमागतं ३ दृष्ट्वा तमुत्थाय चालिंग्य पूजयित्वा यथावि
धि कृतातिथ्यं सुखासीनं मारीचो वाक्यमब्रवीत् ४ समागमनमेतत्ते रथेनैकेन रावण चिंतापर इवाभासि हृदि कार्यं विचिंतयन् ५ ब्रूहि मे न हि गोप्यं चेत्कर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाणि न वप्रियं न्याय्यं च ब्रूहि राजेंद्र रजिनं मां स्पृशेन्नहि ६ रावण उवाच अ
२। स्ति राजा दशरथः साकेताधिपतिः किल रामनामा सुतस्तस्य ज्येष्ठः सत्यपराक्रमः
७ विवासयामास सुतं वनं वनजनप्रियं भार्यया सहितं भ्रात्रा लक्ष्मणेन स
मन्वितं ८ स आस्ते विपिने घोरे पंचवट्याश्रमे शुभे तस्य भार्या विशालाक्षी सी
ता लोकविमोहिनी ९ रामो निरपराधान्मे राक्षसान्भीमविक्रमान् खरं च वि
पिने हत्वा सुखमास्तेऽतिनिर्भयः १० भगिन्या मे शूर्पणख्या निर्दोषायाश्च ना
सिकां कर्णौ चिच्छेद दुष्टात्मा वने तिष्ठति निर्भयः ११ अतस्त्वया सहायेन
गत्वा तत्प्राणवल्लभां आनयिष्यामि विपिने रहितो राघवेण तां १२ त्वं तु माया
मृगो भूत्वा ह्याश्रमादपनेष्यसि रामं च लक्ष्मणं चैव तदा सीतां हराम्यहं १३ त्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰ आ॰ ६ तुतावत्सहायंमेकृत्वास्थास्यसिपूर्ववत् इत्येवं भाषमाणंत्तंरावणंवीक्ष्यविस्म
स्मितः १४ मारिचउ॰ केनेदमुपदिष्टंतेमूलघात्तकरंवचः सएवशत्रुर्वध्यश्च
१९ यस्त्वन्नाशंप्रतीक्षते १५ रामस्यपौरुषंस्मृत्वाचिंतंमेद्याऽपिरावण बालोपिमांकौ
शिकस्ययज्ञसंरक्षणायसः १६ आगतस्त्विषुणैकेनपातयामाससागरे योजना
नांशतंरामस्तदादिभयविह्वलः १७ स्मृत्वास्मृत्वानदेवाहंरामंपश्यामिसर्वतः
१८ दंडकेपिपुनरप्यहंवनेपूर्ववैरमनुचिंतयन्हृदि तीक्ष्णशृंगमृगरूपमे
कदामाद्दशैर्बहुभिरावृतोभ्ययां १९ राघवंजनकजासमन्वितंलक्ष्मणेनसहितं १९
त्वरान्वितः आगतोहमथहंतुमुद्यतोमांविलोक्यशरमेकमक्षिपत् २० तेनविं
द्धहृदयोहमुद्भ्रमन्राक्षसेंद्रपतितोस्मिसागरे तत्रमृत्युहमिदंसमाश्रितः स्था

=ध्वस्तेतिशेषः

३: अथापिमच्चित्तविकारहेतुर्विशेषः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१राभानागमनेनिश्चयेननिर्भयं १=भोगसमूहसाधनत्वोपीयर्थः

नमूर्जितमिदं भयार्दितः २१ राममेवसततं विभावये भीतभीतइव भोगराशितः
राजरत्नरमणीरथादिकं श्रोत्रयोर्यदि गतं भयं भवेत् २२ रामआगतइहेतिशं
कयाबाह्यकार्यमपिसर्वमत्यजं निद्रयापरिहृतो यदास्वपे राममेवमनसाऽनु आत्मनेपदमार्षं
(पश्यन्)
चिंतयन् २३ स्वप्नदृष्टिगतराघवं तदाबोधितोविगतनिद्रआस्थितः तद्भुवा आसनेभयेयमिति शेषः।
नपिविमुच्यचाऽग्रहं राघवं प्रतिगृहं प्रयाहि भोः २४ रक्षराक्षसकुलं त्विरागतं त
त्स्मृतोसकलमेवनश्यति तवहितं वदतोममभाषितं परिगृहाण परात्मनि
राघवे २५ त्यजविरोधमतिं भजभक्तितः परमकारुणिको रघुनंदनः अहम
शेषमिदं मुनिवाक्यतोऽश्रृणवमादियुगे परमेश्वरः २६ ब्रह्मणार्थितउवाचतं
हरिः किंतवेप्सितमहं करवाणि तत् ब्रह्मणोक्तमरविंदलोचनत्वंप्रयाहि भुविमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धत्वेतिशेषः। प्राप्य

रा॰ आ॰ ६ नुषंवपुः २७ दशरथात्मजभावमंजसाजहिरिपुंदशकंधरंहरे अतोनमानु
२० षोरामःसाक्षान्नारायणोव्ययः मायामानुषवेषेणवनंयातोऽतिनिर्भयः २८
भूभारहरणार्थायगछतानगृहंसुखं श्रुत्वामारीचवचनंरावणःप्रत्यभाषत २९
परमात्मायदारामःप्रार्थितोब्रह्मणाकिल मांहंतुंमानुषोभूत्वायत्नादिहसमाग
तः ३० करिष्यत्यचिरादेवसत्यसंकल्पईश्वरः अतोहंयत्नतःसीतामानेष्यामेंय
न्मय वैराघवात् ३१ वधेप्राप्तेरणेवीरप्राप्स्यामिपरमंपदं यद्वारामंरणेहत्वासी
तांप्राप्स्यामिनिर्भयः ३२ अतोत्तिष्ठमहाभागविचित्रमृगरूपधृक् रामंसल
क्ष्मणंशीघ्रमाश्रमादतिदूरतः ३३ आकृष्यगछत्वंशीघ्रंसुखंतिष्ठयथापु २०
रा अतःपरंचेद्यत्किंचिद्दूषसेमद्विभाषणं ३४ हनिष्याम्यसिनानेनत्वाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रैव न संशयः मारीचस्तद्वचः श्रुत्वा स्वात्मन्येवानुचिंतयन् २५ यदि मां राघवो
हन्यात्तदा मुक्तो भवार्णवात् मां हन्याद्यदि चेद्दुष्टस्तदा मे निरयो ध्रुवं २६ इति
३ मरणमेव सम्यगिति निश्चित्य निश्चित्य मरणं रामादुत्थाय वेगतः अब्रवीद्रावणं राजन्करोम्याज्ञां तव प्रभो
२७ इत्युक्त्वा रथमास्थाय गत्वा रामाश्रमं प्रति शुद्धजांबूनदप्रख्यो मृगो भू
त्वा रूप्यबिंदुकः २८ रत्नशृंगो मणिखुरो नीलरत्नविलोचनः विद्युत्प्रभो विमु
ग्धास्यो विचचार वनांतरे २९ रामाश्रमपदस्यांते सीतादृष्टिपथे चरन् ४०
क्षणं च धावत्यवतिष्ठते क्षणं समीपमागत्य पुनर्भे याद्रतः एवं समायाम पलायते इति शेषः
गवेषरूपश्चचार सीतां परिमोहयन्खलः ४१ इति श्रीमदध्यात्मरामायणे अ
रण्यकांडे षष्ठः सर्गः ६ श्रीमहादेव उवाच अथ रामोपि तत्सर्वं ज्ञात्वा रावण

रा० आ० ७ चेष्टितं उवाच सीतां मे कांते श्रृणु जानकि मद्वचः १ रावणो भिक्षुरूपेण आग
३१ मिष्यति तेंऽतिकं त्वं तु छायां त्वदाकारां स्थापयित्वोटजे विश २ अग्नावदृ
श्यरूपेण वर्षंतिष्ठ ममाज्ञया रावणस्य वधांते मां पूर्ववत्प्राप्स्यसे शुभे ३
श्रुत्वा रामोदितं वाक्यं सापि तत्र तथाकरोत् मायासीतां बहिः स्थाप्य स्वय
मंतर्दधेऽनले ४ मायासीता तदाऽपश्यन्मृगं मायाविनिर्मितं हसंती राम
मभ्येत्य प्रोवाच विनयान्विता ५ पश्य राम मृगं चित्रं कनकं रत्नभूषितं वि
चित्रबिंदुभिर्युक्तं चरंतमकुतोभयं ६ बध्वा देहि मम क्रीडामृगो भवतु सुं
दरः तथेति धनुरादाय गच्छन् लक्ष्मणमब्रवीत् ७ रक्ष त्वमपि यत्नेन सी ३१
तां मत्प्राणवल्लभां मायिनः संति विपिने राक्षसा घोरदर्शनाः ८ अतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रावहितः साध्वी रक्ष सीतामनिंदितां लक्ष्मणो राम माहेदं देवायं मृगरू
पधृक् मारीचोत्र न संदेह एवंभूतो मृगः कुतः ९ श्रीराम उवा॰ यदि मा
रीच एवायं तदा हन्मि न संशयः मृगश्चेदानयिष्यामि सीताविश्रामहेत
वे १० गमिष्यामि मृगं बध्वा ह्यानयिष्यामि सत्वरः त्वं प्रयत्नेन संतिष्ठ सीता
संरक्षणोद्यतः ११ इत्युक्त्वा प्रययौ रामो मायामृगमनुद्रुतः मायाया दाश्र
या लोकमोहिनी जगदाकृतिः १२ निर्विकारश्चिदात्मापि पूर्णोपि मृगमन्
व न्वगात् भक्तानुकंपी भगवानिति सत्यैंचोहरिः १३ कर्तुं सीताप्रियार्थाय
जानन्नपि मृगं ययौ अन्यथा पूर्णकामस्य रामस्य विदितात्मनः १४ मृगे
णवा स्त्रियावापि किं कार्यं परमात्मनः कदाचिद्दृश्यते ऽस्यारोक्षणं धावति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लीलया २५ दृश्यतेच ततोदूराद्देवंराममपाहरत् ततोरामोपिविज्ञायराक्षसोय
मितिस्फुटं २६ विव्याधशरमाधायराक्षसंमृगरूपिणं पपानरुधिराक्तास्यो
मारीचः पूर्वरूपधृक् २८ हाहतोस्मिमहाबाहोत्राहिलक्ष्मणमांद्रुतं इत्यु
क्त्वारामवद्वाचापपानरुधिराननः २९ यन्नामाज्ञोपिमरणेस्मृत्वातत्साम्य
माप्नुयात् किमुताग्रेहरिंपश्यन् तेनैवनिहतोसुरः २० तद्देहादुत्थितंतेजः
सर्वलोकस्यपश्यतः राममेवाविशद्दृष्ट्वा विस्मयंपरमंययुः २१ किंकर्मकृ
त्वाकिंप्राप्तः पापकर्मामुनिहिंसकः अथवाराघवस्यायं महिमानात्रसंशयः यं २२
॥ २२ रामबाणेनसंविद्धः पूर्वंराममनुस्मरन् भयात्सर्वंपरित्यज्यगृहेवि
त्तादिकंचयत् २३ हृदिरामंसदाध्यात्वानिर्धूताशेषकल्मषः अंतेरामेणनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हतःपश्यन्नाममवापसः २४ द्विजोवाराक्षसोवापि पापीवाधार्मिकोपिवा
त्यजन्कलेवरंरामंस्मृत्वायातिपरंपदं २५ इतितेऽन्योन्यमाभाष्यततोदेवादि
वंययुः रामस्तुचिंतयामासम्रियमाणोऽसुराधमः २६ हालक्ष्मणेतिमद्वाक्यम य ३
नुकुर्वन्ममारकिं श्रुत्वामद्वाक्यसदृशंवाक्यंसीतापिकिंभवेत् २७ इतिचिंताप
रीतात्मारामोदूरान्न्यवर्तत सीतातदाकर्णितंश्रुत्वामारीचस्यदुरात्मनः २८ भी
ताति दुःखसंविग्नालक्ष्मणंत्विदमब्रवीत् गच्छलक्ष्मणवेगेनभ्राताते ऽसुरपी
डितः २९ हालक्ष्मणेतिवचनंभ्रातुस्तेनशृणोषिकिं तामाहलक्ष्मणोदेवि
रामवाक्यंनतद्भवेत् ३० यःकश्चिद्राक्षसोदेविम्रियमाणोब्रवीद्वचः रामः
स्त्रैलोक्यमपियःक्रुद्धोनाशयतिक्षणात् ३१ सकथंदीनवचनंभाषतेमरप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा० आ० ७ जितः क्रुद्धा लक्ष्मणमालोक्य सीता बाष्पविलोचना ३२ प्राह लक्ष्मण दुर्बुद्धे
२२ भ्रातुर्व्यसनमिच्छसि प्रेषितो भरतेनैव रामनाशाभिकांक्षिणा ३३ मां नेतुमाग
तोसि त्वं रामनाशेऽउपस्थिते न प्राप्स्यसे त्वं मामद्य पश्य प्राणांस्त्यजाम्यहं ३४
नो नज्ञोनीरघ्रंरामस्त्वां भार्याहरणे घृतं रामादन्यं न स्प्रक्ष्यामि त्वां वा भरतमेव वा ३५
इत्युक्त्वा बध्यमानाशा सा स्वबाहुभ्यां रुरोद ह तच्छ्रुत्वा लक्ष्मणः कर्णौ पिधायाती
व दुःखितः ३६ मामेवं भाषसे चंडि धिक् त्वां नाशमुपैष्यसि इत्युक्त्वा वनदेवी
भ्यः समर्प्य जनकात्मजां ३७ ययौ दुःखान्वितः सविग्नो रामम् एव शनैः शनैः ततो
ऽन्तरं समालोक्य रावणो भिक्षुवेषधृक् ३८ सीतासमीपमगमत् स्फुरद्दंडकमं २२
डलुः सीतानमवलोक्याशु नत्वा संपूज्य भक्तितः ३९ कंदमूलफलादीनि दत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वागतमब्रवीत् मुनेर्भुंक्ष्वफलादीनिविश्रमस्वयथासुखं ५० इदानीमेवभर्त्ता
मेह्यागमिष्यतितेप्रियं करिष्यतिविशेषेणतिष्ठत्वंपादिशेचने ५१ भिक्षुरुवा॰
कात्वंकमलपत्राक्षिकोवाभर्त्तातवानघे किमर्थमत्रतेवासोवनेराक्षससेवि
ते ब्रूहिभद्रेततःसर्वंस्ववृत्तांतंनिवेदये ५२ सीतोवाच अयोध्याधिपतिःश्री
मान्राजादशरथोमहान् तस्यज्येष्ठःसुतोरामःसर्वलक्षणलक्षितः ५३ त
स्याहंधर्मतःपत्नीसीताजनकनंदिनी तस्यभ्राताकनीयांश्चलक्ष्मणोभ्रातृव
त्सलः ५४ पितुराज्ञांपुरस्कृत्यदंडकेवस्तुमागतः चतुर्दशसमास्त्वांतुज्ञातु
मिच्छामिमेवद ५५ भिक्षुरुवा॰ पौलस्त्यतनयोहंतुरावणोराक्षसाधिपः
त्वत्कामपरितप्तोहंत्वांनेतुंपुरमागतः ५६ मुनिवेषेणरामेणकिंकरिष्यसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰आ॰७ मां भज भुंक्ष्व भोगान्मया सार्धं त्यज दुःखं वनोद्भवं ४७ श्रुत्वा तद्वचनं सीता
२५ भीता किंचिदुवाच तं यद्येवं भाषसे मां त्वं नाशमेष्यसि राघवात् ४८ आग
मिष्यति रामोपि क्षणं तिष्ठ सहानुजः मां कोधर्षयितुं शक्तो हरेर्भार्यां शशोय
था ४९ रामबाणैर्विभिन्नस्त्वं पतिष्यसि महीतले इति सीतावचः श्रुत्वा राव
णः क्रोधमूर्छितः ५० स्वरूपं दर्शयामास महापर्वतसन्निभं दशास्यं विं
शतिभुजं कालमेघसमद्युतिं ५१ तं दृष्ट्वा वनदेव्यश्च भूतानि च वित्रसुः ततो वि श्री
दार्य धरणीं नखैरुद्धृत्य बाहुभिः ५२ तोलयित्वा रथे क्षिप्त्वा ययौ क्षिप्रं विहायसा
हा राम हा लक्ष्मणेति रुदती जनकात्मजा ५३ तयोद्विग्नमनादीना पश्यन्ती भुव २५
मेव सा श्रुत्वा तत्क्रंदितं दीनं सीतायाः पक्षिसत्तमः ५४ जटायुरुस्थितः शीघ्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्वगच्छसि
नगाग्रात्तीक्ष्णतुंडकः तिष्ठतिष्ठेति तंप्राह कोगच्छति ममाग्रतः ५५ मुषित्वालो
कनाथस्य भार्यांभ्रून्याहृनालपात् श्वुनकोमंत्रपूतंत्वंपुरोडाशमिवाध्वरे
५६ इत्युक्त्वातीक्ष्णतुंडेनचूर्णयामासतद्रथं वाहान्बिभेदपादाभ्यांचूर्ण
यामासतद्धनुः ५७ ततःसीतांपरित्यज्यरावणःखड्गमाददे चिच्छेदपक्षौ।
सामर्षःपक्षिराजस्यधीमतः ५८ पपातकिंचिच्छेषेणप्राणेनभुविपक्षिरा
ट् पुनरन्यरथेनाशुसीतामादायरावणः ५९ क्रोशंतीरामरामेतित्राता
रंनाधिगच्छती हारामहाजगन्नाथमांनपश्यसिदुःखितां ६० रक्षसानीय
मानांस्वांभार्यांमोचयराघव हालक्ष्मणमहाभागत्राहिमामपराधिनीं ६१
वाक्शरेणहतस्त्वंमेक्षंतुमर्हसिदेवर इत्येवंक्रोशमानांतांरामागमनशंक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा० आ० ७ या ६२ जगामवायुवेगेनसीतामादायसत्वरः विहायसानीयमानासीतापश्य
२५ द्धोमुखी ६३ पर्वताग्रेस्थितान्पंचवानरान्वारिजानना उत्तरीयार्धखंडेन
विमुच्याभरणादिकं ६४ बध्वाचिक्षेपरामायकथयंत्वितिपर्वते ६४ ततः
समुद्रमुल्लंघ्यलंकांगत्वासरावणः स्वांतःपुरेरहस्येतामशोकाविपिनेक्षिप
त् ६५ राक्षसीभिःपरिवृतांमातृबुध्यानुपालयत् ६६ स्नानादिनापरिव शरीरसंस्कारादिः
मेवर्जितादुःखेनशुष्यद्वदनातिविह्वला हारामरामेतिविलपमानासी
तास्थिताराक्षसीवृंदमध्ये ६७ ॥इतिश्रीअरण्यकांडेसप्तमःसर्गः ७ २५
श्रीमहादेवउवाच रामोमायाविनंहत्वाराक्षसंकामरूपिणं प्रतस्थेस्वाश्रमं
गंतुंततोदूराद्ददर्शतं १ आयांतंलक्ष्मणंदीनंमुखेनपरिशुष्यता राघ

रहसि एतां

वश्चिंतयामास स्वात्मन्येवमहामतिः २ लक्ष्मणस्तन्न जानाति मायासीतां मया कृतां ज्ञात्वाप्येनं वंचयित्वा शोचामि प्राकृतो यथा ३ यद्यहं विरतो भूत्वा तूष्णीं स्थास्यामि मंदिरे तदा राक्षसकोटीनां वधोपायः कथं भवेत् ४ य दि शोचामि तां दुःखसंतप्तः कामुको यथा तदा क्रमेणानुचिन्वन्सीतां यास्ये सुरालयं रावणं सकुलं हत्वा सीतामग्नौ स्थितां पुनः ५ मयैव स्थापितां नीत्वा यातायोध्यामतंद्रितः अहं मनुष्यभावेन जातोस्मि ब्रह्मणार्थितः ६ मनुष्यभावमापन्नः किंचित्कालं वसामि कौ ततो मायामनुष्यस्य चरितं मेनु शृण्वतां ७ मुक्तिः स्यादप्रयासेन भक्तिमार्गानुवर्तिनां निश्चित्यैवं तदा दृष्ट्वा लक्ष्मणं वाक्यमब्रवीत् ८ किमर्थमागतोसि त्वं सीतां त्यक्त्वा मम प्रियां नीता वा भक्षिता वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा०आ०८ पिराक्षसैर्जनकात्मजा ९ लक्ष्मणः प्रांजलिः प्राह सीतायाः दुर्वचो रुदन्
२६ हा लक्ष्मणेति वचनं राक्षसोक्तं श्रुतं तया त्वद्वाक्यसदृशं श्रुत्वा मां गच्छेति त्व
रान्नब्रवीत् १० रुदंती सा मया प्रोक्ता देवि राक्षसभाषितं नेदं रामस्य वचनं स्व
स्था भव शुचिस्मिते ११ इत्येवं सांत्विता साध्वी मर्यो प्रोवाच मां पुनः यदुक्तं
दुर्वचो राम न वाच्यं पुरतस्तव १२ कर्णौ पिधाय निर्गत्य यातोहं त्वां समीक्षि
तुं रामस्तु लक्ष्मणं प्राह तथाप्यनुचितं कृतं १३ त्वया स्त्रीभाषितं सत्यं कृत्वा
त्यक्ता शुभानना नीता वा भक्षिता वापि राक्षसैर्नोत्र संशयः १४ इति चिं
तापरो रामः स्वाश्रमं त्वरितं ययौ तत्रादृष्ट्वा जनकजां विललापातिदुःखितः
१५ हा प्रिये क्व गतासि त्वं नासि पूर्ववदाश्रमे अथवा मद्विमोहार्थं लील २६

२ श्रुभानवमांसंक्षयरामं तं तदन्नचितं कृत्वा विसृज्य यः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याक्वविलीयसे १६ इत्याचिन्त्य वनं सर्वं नापश्यज्जानकीं तदा वनदेव्यः कुतः
सीता ब्रुवंतु मम वल्लभा १७ मृगाश्च पक्षिणो वृक्षाद्दृष्टा यं तु मम प्रियां इत्येवं वि
लपन्नेव रामः सीतां न कुत्रचित् १८ सर्वज्ञः सर्वथा क्वापि नापश्यद्रघुनंदनः
आनंदोप्यनुशोच नामचलोप्यनुधावति १९ निर्ममो निरहंकारोप्यखंडानंदरू
पवान् मम जायेति सीतेति विलपन्नतिदुःखितः २० एवं मायामनुचरन्नस
क्तोपि रघूत्तमः आसक्त इव मूढानां भाति तत्त्वविदां नहि २१ एवं विचिन्वन्स
कलं वनं रामः सलक्ष्मणः भग्नं रथं छत्रचापं कूबरं पतितं भुवि २२ दृष्ट्वा
लक्ष्मण माहेदं पश्य लक्ष्मण केनचित् नीयमानां जनकजां तं जित्वान्योज
हार तां २३ ततः कंचिद्द्रुवो भागं गत्वा पर्वतसन्निभं रुधिराक्तवपुर्दृष्ट्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा० आ० ८ रामोवाक्यमथाब्रवीत् २४ एषवैभक्षयित्वातांजानकींशुभदर्शनां। शेतेवि
२७ विक्तेऽतितृप्तः पश्य हन्मिनिशाचरं २५ चापमानयशीघ्रंमेबाणंचरघुनं
दन सश्रुत्वारामवचनंजटायुःप्राहभीतवत् २६ मांनमारयभद्रंतेम्रियमा
णंस्वकर्मणा अहंजटायुस्तेभार्याहारिणंसमनुद्रुतः २७ रावणंतत्रयुद्धं
मेबभूवारिविमर्दन तस्यवाहान्रथंचापंछित्वाऽहंतेनघातितः २८ पति
तोस्मिजगन्नाथप्राणांस्त्यक्ष्यामिपश्यमां तच्छ्रुत्वाराघवोदीनंकंठप्राणंददर्श
ह २९ हस्ताभ्यांसंस्पृशन्गात्रामोदुःखाश्रुवृत्तलोचनः ३० जटायोब्रूहिमेभार्या २७
केननीताशुभानना मत्कार्यार्थेहतोसित्वमतोमेप्रियबांधवः ३१ जटायुः
सन्नयावाचावक्त्राद्रक्तंसमुद्वमन् उवाचरावणोरामराक्षसोभीमविक्रमः
३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आदायमैथिलींसीतांदक्षिणाभिमुखोययौ इतोवक्तुंनमेशक्तिः प्राणांस्त्यक्ष्या
मितेग्रतः ३३ दिष्ट्यादृष्टोसिरामत्वंम्रियमाणेनमेऽनघ परमात्मासिवि
ष्णुस्त्वंमायामनुजरूपधृक् ३४ अंतकालेपिदृष्ट्वात्वांमुक्तोऽहंरघुसत्तम हस्ता
भ्यांस्पृशमांरामपुनर्यास्यामितेपदं ३५ तथेतिरामःपस्पर्शतदंगंपाणिनास्म
यन् ततःप्राणान्परित्यज्यजटायुःपतितोभुवि ३६ रामस्तमनुशोचित्वाबंधुव
त्साश्रुलोचनः लक्ष्मणेनसमानाय्यकाष्ठानिप्रददाहतं ३७ स्नात्वादुःखेनरा
मोपिलक्ष्मणेनसमन्वितः हत्वावनेमृगंतत्रमांसखंडान्समंततः ३८ शाद्व
लेप्राक्षिपद्रामःपृथक्पृथगनेकधा भक्षंतुपक्षिणःसर्वेतृप्तोभवतुपक्षिरा
ट् ३९ इत्युच्चार्यराघवःप्राहजटायोगच्छमत्पदं मत्सारूप्यंभजस्वाद्यसर्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा०आ०८ लोकस्य पद्मपतेः ४० ततोनंतरमेवासौ दिव्यरूपधरः प्रभुः विमानवरमारुह्य
२८ भास्वरं भानुसन्निभं ४१ शंखचक्रगदापद्मकिरीटवरभूषणैः द्योतयन्स्वप्र
कांत्यानपीतांबरधरो मलः ४२ चतुर्भिः पार्षदैर्विष्णोस्तादृशैरभिपूजितः स्तूय
भा मानो योगिगणैः राममाप्यसत्वरः ४३ कृतांजलिपुटो भूत्वा तुष्टाव रघुनंदनं
४३ जटायुरुवाच अगणितगुणमप्रमेयमाद्यं सकलजगत्स्थितिसंयमा
दिहेतुं उपरमपरमं परात्मभूतं सततमहं प्रणतोस्मि रामचंद्रं ४४ निरव
धिसुखमिंदिराकटाक्षं क्षपितसुरेंद्रचतुर्मुखादिदुःखं नरवरमनिशं नतो
स्मि रामं वरदमहं वरचापबाणहस्तं ४५ त्रिभुवनकमनीयरूपमीड्यं रविशतभासुरमीहितप्रदानं शरणदमनिशं सुरागमूले कृतनिलयं रघुनंदनं प्रप २८
१ शोभनरागः प्रीतिस्तन्मूले आश्रयेचित्ते कृतस्थानं

उपरमः शांतिरेव परमा परा यस्य भावस्मिन्सि सर्वेषां

द्ये ४६ भवविपिनदवाग्निनामधेयं भवमुखदैवतदैवतं दयालुं दनुजपति
सहस्रकोटिनाशं रवितनयासदृशं हरिं प्रपद्ये ४७ अविरतभवभावना
तिदूरं भवविमुखैर्मुनिभिः सदैव दृश्यं भवजलधिसुतारणांघ्रिपोतं शर
णमहं रघुनंदनं प्रपद्ये ४८ गिरिशगिरिसुतामनोनिवासं गिरिवरधारि अयमेव कृष्णो भावीति भावः
ईहितैरभिरामं अभिरामचेष्टितमितियावत् णमीहिताभिरामं सुरवरदनुजेंद्रसेवितांघ्रिं सुरवरदं रघुनायकं प्रपद्ये
४९ परधनपरदारवर्जितानां परगुणभूतिषु तुष्टमानसानां परहितनिर
तात्मनां सुसेव्यं रघुवरमंबुजलोचनं प्रपद्ये ५० स्मितरुचिरविकासितान
नाब्जमतिसुलभं सुरराजनीलनीलं सितजलरुहचारुनेत्रशोभं रघुपतिमी
शगुरोर्गुरुं प्रपद्ये ५१ हरिकमलजशंभुरूपभेदात्त्वमिह विभासि गुणत्र
ब्राह्मणः इंद्रनीलमणिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ कामतोपि शतकोटिगुणितं सुंदरमंगं यस्य। शतपथो माध्यंदिनानां ब्राह्मणं तज्जो चरयालत्रो ऋप्रकारया भावनया ऽविदूरं लभ्यमिति यावत्

आ०रा०८ यानुवृत्तः ॥ रविरिवजलपूरितोदपात्रेष्वमरपतिस्तुतिपात्रमीशमीडे ५२ रतिप
२९ तिशतकोटिसुंदरांगं शतपथगोचरभावनाविदूरं यतिपतिहृदयेसदाविभातं
रघुपतिमार्तिहरंप्रभुंप्रपद्ये ५३ इत्येवंस्तुवतस्तस्यप्रसन्नोभूद्रघूत्तमः उवा
चगच्छभद्रंतेममविष्णोःपरंपदं ५४ शृणोतियइदंस्तोत्रंलिखित्वानियतःपठेत्
सयातिममसारूप्यंमरणेमत्स्मृतिंलभेत् ५५ इतिराघवभाषितंतदाश्रुतवान्
हर्षसमाकुलोद्विजः रघुनंदनसाम्यमास्थितः प्रययौब्रह्मसुपूजितंपदं ५६
॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेअरण्यकांडेअष्टमःसर्गः ८
श्रीमहादेवउ० ततोरामोलक्ष्मणेनजगामविपिनांतरं पुनर्दुःखंसमाश्रित्यसी २९
तान्वेषणतत्परः १ तत्राद्भुतसमाकारोराक्षसःप्रत्यदृश्यत वृक्षस्येवमहाकृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्यसुरादिविवर्जितः २ बाहूयोजनमात्रेण व्याप्तौतस्य रक्षसः कबंधोनामदै
त्येंद्रः सर्वसत्वविहिंसकः ३ तद्बाह्वोर्मध्यदेशेनौचरंतौरामलक्ष्मणौ ददर्शा
तुर्महासत्वंतद्बाहुपरिवेष्टितौ ४ रामः प्रोवाचविहसन् पश्यलक्ष्मणराक्षसं शि
रःपादविहीनोयंयस्यवक्षसिचाननं ५ बाहुभ्यांलभ्यतेयद्यत्तद्भक्षन्स्थितो त
ध्रुवं आवामप्यनयोर्बाह्वोर्मध्येसंकल्पितौध्रुवं ६ गंतुमन्यत्रमार्गेनदक्ष
तेरघुनंदन किंकर्तव्यमितोस्माभिरिदानींभक्षयेत्सनौ ७ लक्ष्मणस्तमुवाचे
दंकिंविचारेणराघव आवामेकैकमव्यग्रौछिंद्यांरक्षोभुजौध्रुवं ८ तथेतिरा
मःखड्गेनभुजंदक्षिणमछिनत् तथैवलक्ष्मणोवामंचिछेदभुजमंजसा ९
ततोतिविस्मितोदैत्यःकौयुवांसुरपुंगवौ मद्बाहुछेदकौलोकेदिविदेवेषुवाकु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰ आ॰ १ तः १० ततोब्रवीद्बसम्भेव रामो राजीवलोचनः अयोध्याधिपतिः श्रीमान्राजाद
३० शरथो महान् ११ रामोहं तस्य पुत्रोसौ भ्राता मे लक्ष्मणः सुधीः मम भार्या जनक
जा सीता त्रैलोक्यसुंदरी १२ आवां मृगयायातौ न दाकेनापि राक्षसा नीतासी
तां विचिन्वंतो चागतौ घोरकानने १३ बाहुभ्यां वेष्टितावत्र नव प्राणरिरक्षया
छिन्नौ तव भुजौ त्वं च को वा विकटरूपधृक् १४ कबंध उवाच धन्योहं यदि रामस्त्व
मागतोसि ममांतिकं पुरा गंधर्वराजोहं रूपयौवनदर्पितः १५ विचरन् लोकम
खिलं वरनारीमनोहरः तपसा ब्रह्मणो लब्धमवध्यत्वं रघूत्तम १६ अष्टावक्रं
मुनिं दृष्ट्वा कदाचिद्धसं पुरा क्रुद्धो सा वाह दुष्ट त्वं राक्षसो भव दुर्मते १७ अष्टा ३०
वक्रः पुनः प्राह वंदितो मे दयापरः शापस्यांतं च मे प्राह तपसा द्योतितात्मनः १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रेतायुगे दाशरथिर्भूत्वा नारायणः स्वयं आगमिष्यति तेन बाहू छिद्येते योजनायतौ
॥ १९ तेन शापाद्विनिर्मुक्तो भविष्यसि यथा पुरा इति शापो हि मद्दत्तः राक्षसीं तनु
मात्मनः २० कदाचिद्देवराजानमभ्यद्रवमहं रुषा सोपि वज्रेण मां राम शिरो दे
शेभ्यताडयत् २१ तदा शिरोगतं कुक्षिं पादौ च रघुनंदन ब्रह्मदत्तवरान्मृत्यु
ना। र्नाभून्मे वज्रताडयत २२ मुखाभावे कथं जीवेदयमित्यमराधिपं ऊचुः सर्वे
दयाविष्टा मां विलोक्यास्यवर्जितं २३ ततो मां प्राह मघवा जठरे ते मुखं भवेत्
बाहू ते योजनायामौ भविष्यत इतो व्रज २४ इत्युक्तोऽत्र वसन्नित्यं बाहुभ्यां
वनगोचरान् भक्षयाम्यधुना बाहू खंडितौ मे त्वयानघ २५ इतः परं मां श्व
भ्रास्ये निक्षिप्याग्नींधनावृते अग्निना दह्यमानोहं त्वया रघुकुलोत्तम
२६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा० आ० ९ पूर्वंरूपमनुप्राप्य भार्यामार्गंवदामिते इत्युक्त्वालक्ष्मणेनाशुश्वभ्रंनिर्माय
३२ तत्रतं २७ निक्षिप्यप्रादहत्काष्ठैस्ततोदेहात्समुत्थितः कंदर्पसदृशाका
रः सर्वाभरणभूषितः २८ रामंप्रदक्षिणंकृत्वासाष्टांगंप्रणिपत्यच कृतां
जलिरुवाचेदंभक्तिगद्गदयागिरा २९ गंधर्वउवा० स्तोतुमुत्सहतेमेद्यम
नोरामातिसंभ्रमात् त्वामनंतमनाद्यंतंमनोवाचामगोचरं ३० सूक्ष्मंते
रूपमव्यक्तंदेहद्वयविलक्षणं दृग्रूपमितरत्सर्वंदृश्यंजडमनात्मकं तत्क
थंत्वांविजानीयाद्व्यतिरिक्तंमनःप्रभो ३१ बुध्यात्माभासयोरैक्यंजीवइत्यभि ३९
धीयते बुध्यादिसाक्षीब्रह्मैवतस्मिन्निर्विषयेखिले ३२ आरोप्यतेऽज्ञा
नवशान्निर्विकारेखिलात्मनि हिरण्यगर्भस्तेसूक्ष्मंदेहंस्थूलंविराट्स्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते ३३ भावनाविषयोरामसूक्ष्मंतेध्यात्ममंगलं भूतंभव्यंभविष्यंचयत्रेदं
दृश्यतेजगत् ३४ स्थूलेंडकोशेदेहेतेमहदादिभिरावृते सप्तभिरुत्तरगु
णैर्वैराजोधारणाश्रयः ३५ त्वमेवसर्वकैवल्यंलोकास्तेऽवयवाःस्मृताः। २ अंतेभाष्यं
पातालंतेपादमूलंपार्ष्णीतवमहातलं ३६ रसातलंतेगुल्फौतुतलात
गुल्फोर्ध्वजान्वधो भागइतिशेषः। लमितीर्यते जानुनीसुतलंरामऊरूतेवितलंतथा ३७ अतलंचमही अतलंचेत्यस्यऊरूर्ध्व जघनाधोभागइतिशेषः
नभोभुवर्लोकः रामजघनंनाभिर्गगनंमेः उरस्थलंतेज्योतींषिग्रीवातेमहउच्यते ३८
ज्योतींषिस्वर्लोकः वदनंजनलोकस्तेतपस्तेशंखदेशगं सत्यलोकोरघुश्रेष्ठशीर्षण्या
स्तेसदाप्रभो ३९ इंद्रादयोलोकपालाबाहवस्तेदिशःश्रुती अश्विनौ
नासिकेरामवक्त्रंतेऽग्निरुदाहृतः ४० चक्षुस्तेसवितारामभनश्चंद्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰ अ॰ १ उदाहृतः भ्रूभंग एव कालस्ते बुद्धिस्ते वाक्यनिर्भवेत् ५१ रुद्रोऽहंकार
द्वादशपंक्तयः। रूपस्ते वाचश्छंदांसि तेऽव्ययः यमस्ते दंष्ट्रदेशस्थो नक्षत्राणि द्विजाल
३२ यः ५२ हासो मोहकरी माया सृष्टिस्ते पांगमोक्षणं धर्मः पुरस्तेऽधर्मश्च
पृष्ठभाग उदीरितः ५३ निमेषोन्मेषणे रात्रिर्दिवा चैव रघूत्तम समु
द्राः सप्त ते कुक्षिस्था नद्यस्तव प्रभो ५४ रोमाणि वृक्षौषधयो रेतो वृ
ष्टिस्तव प्रभो महिमा ज्ञानशक्तिस्ते एवं स्थूलवपुस्तव ५५ यद्यस्मिन्स्थूल
रूपे ते मनः संधार्यते नरैः अनायासेन मुक्तिः स्याद् तोऽन्यन्न हि किंचन
५६ अतोऽहं राम रूपं ते स्थूलमेवानुभावये यस्मिन्ध्याने प्रेमरसः स ३२
रोमपुलको भवेत् ५७ तदैव मुक्तिः स्याद्राम यदा ते स्थूलभावकः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्व्याप्तास्त्वांनवेदाहमेतद्रूपंविचिंतये ४८ धनुर्बाणधरंश्यामंजटाव
ल्कलभूषितं अपीच्यवयसंसीतांविचिन्वंतंसलक्ष्मणं ४९ इदमेवस
दामेस्यान्मानसेरघुनंदन सर्वज्ञःशंकरः साक्षात्पार्वत्यासहितःसदा ५०
त्वद्रूपमेवसततंध्यायन्नास्तेरघूत्तम मुमुक्षूणांसदाकाश्यांतारकंब्रह्मवाच
कं ५१ रामरामेत्युपदिशन्सदासंतुष्टमानसः अतस्त्वंजानकीनाथपरमात्मा
सुनिश्चितः ५२ सर्वेतेमाययामूढास्त्वांनजानंतितत्वतः नमस्तेरामभद्रायवेध
सेपरमात्मने ५३ अयोध्याधिपतेतुभ्यंनमःसौमित्रिसेवित त्राहित्राहिज
गन्नाथमांमायानावृणोतुते ५४ श्रीरामउवा॰ तुष्टोहंदेवगंधर्वभक्त्यास्तुत्या
चतेनघ याहिमेपरमंस्थानंयोगिगम्यंसनातनं ५५ जपंतियेनित्यमनन्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰आ॰९ बुध्याभक्त्यात्वदुक्तं स्तवमागमोक्तं तेऽज्ञानसंभूतभवंविहायमांयांतिनित्यानुभ
२२ वानुमेयं ५६ ॥इतिश्रीमदध्यात्मरामायणेअरण्यकांडेनवमःसर्गः ९ ल श्रीमहादेव॰
ब्ध्वावरंसगंधर्वःप्रयास्यन्राममब्रवीत् शबर्यास्तेपुरोभागेआश्रमेरघुनंद
न १ भक्त्यात्वत्पादकमलेभक्तिमार्गविशारदा तांप्रयाहिमहाभागसर्वंतेकथयि
ष्यति २ इत्युक्त्वाप्रययौसोपिविमानेनार्कवर्चसा विष्णोःपदंरामनामस्मरणेफ
लमीदृशं ३ त्यक्त्वातद्विपिनंघोरंसिंहव्याघ्रादिदूषितं शनैस्तथाश्रमपदंशब
र्यारघुनंदनः ४ शबरीराममालोक्यलक्ष्मणेनसमन्वितं आयांतंरामं हर्षेणप्र
त्युत्थायाचिरेणसा ५ पतित्वापादयोरग्रेहर्षपूर्णाश्रुलोचना स्वागतेनाभिनं २२
द्याथस्वासनेसंन्यवेशयत् ६ रामलक्ष्मणयोःसम्यक्पादौप्रक्षाल्यभक्तितः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नत्कले नाभिषिच्यांगमथार्घ्योदिभिरादृता ७ संपूज्यविधिवद्रामंससौमित्रिंसप
र्यया संगृहीतानिदिव्यानिरामार्थंशबरीमुदा ८ फलान्यमृतकल्पानिददौरामा
यभक्तितः पादौसंपूज्यकुसुमैःसुगंधैःसानुलेपनैः ९ कृतातिथ्यंरघुश्रेष्ठमुप
विष्टंसहानुजं शबरीभक्तिसंपन्नाप्रांजलिर्वाक्यमब्रवीत् १० अत्राश्रमेरघुश्रे
ष्ठगुरवोमेमहर्षयः स्थिताःशुश्रूषणंतेषांकुर्वतीसमुपस्थिता ११ बहुवर्षस
हस्त्राणिगतास्तेब्रह्मणःपदं गमिष्यंतोऽब्रुवन्मांत्वंवसात्रैवसमाहिता १२ रामो
दाशरथिर्जातःपरमात्मासनातनः राक्षसानांवधार्थायऋषीणांरक्षणायच
१३ आगमिष्यतिचैकाग्रध्याननिष्ठास्थिराभव इदानींचित्रकूटाद्रावाश्रमेव
सतिप्रभुः १४ यावदागमनंतस्यतावद्रक्षकलेवरं दृष्ट्वैवराघवंदग्ध्वादेहंयास्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰ अ॰ १० सितत्पदं २५ तथैवाकरवं राम त्वद्ध्यानैकपरायणा प्रतीक्ष्यागमनं तेद्य सफलं गुरु
३४ भाषितं २६ तवसंदर्शनं राम गुरूणामपि मे न हि योषिन्मूढाऽप्रमेयात्मन्हीनजा
तिसमुद्भवा २७ तवदासस्यदासानांशतसंख्योत्तरस्यवा दासीत्वेनाधिकारो
स्तिकुतः साक्षात्तवैवहि २८ कथंरामाद्यमेदृष्टस्त्वंमनोवागगोचरः स्तोतुंनजा
नेदेवेशकिंकरोमिप्रसीदमे २९ श्रीरामउ॰ पुंस्त्वेस्त्रीत्वेविशेषोवाजातिनामाश्र ती
मादयः नैवद्रष्टुमहंशक्योमद्भक्तिविमुखैःसदा २० यज्ञदानतपोभिर्वावेदाध्य
पनकर्मभिः नैवद्रष्टुमहंशक्योमद्भक्तिविमुखैःसदा २१ तस्माद्भामिनिसंक्षे
पाद्वक्ष्येहंभक्तिसाधनं सतांसंगतिरेवात्रसाधनंप्रथमंस्मृतं २२ द्वितीयं ३४
मत्कथालापस्तृतीयंमद्गुणेरणं व्याख्यातृत्वंमद्वचसांचतुर्थंसाधनंभवेत् २३
नकारणंमद्भजनेभक्तिरेवहिकारणं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आचार्योपासनं भद्रे मद्बुद्ध्याऽमायया सदा पंचमं पुण्यशीलत्वं यमादिनियमा
दि च २४ निष्ठा मत्पूजने नित्यं षष्ठं साधनमीरितं मम मंत्रोपासकत्वं सांगं सप्त
ममुच्यते २५ मद्भक्तेष्वधिका पूजा सर्वभूतेषु मन्मतिः बाह्यार्थेषु विरागित्वं शमा
दिसहितं तथा २६ अष्टमं नवमं तत्त्वविचारो मम भामिनि एवं नवविधं भक्तिसा
धनं यस्य कस्य वा २७ स्त्रियो वा पुरुषस्यापि तिर्यग्योनिगतस्य वा भक्तिः संजा ति
यते प्रेमलक्षणा शुभलक्षणे २८ भक्तौ संजातमात्रायां मत्तत्त्वानुभवस्तदा
ममानुभवसिद्धस्य मुक्तिस्तत्रैव जन्मनि २९ स्यात्तस्मात्कारणं भक्तिर्मोक्षस्ये
ति सुनिश्चितं प्रथमं साधनं यस्य भवेत्तस्य क्रमेण तु ३० भवेत्सर्वं ततो भक्ति
र्मुक्तिरेव सुनिश्चितं यस्मान्मद्भक्तियुक्ता त्वं ततोऽहं त्वामुपस्थितः ३१ इतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰ आ॰ १० मद्दर्शनान्मुक्तिस्तव नास्त्यत्र संशयः यदि जानासि मे ब्रूहि सीता कमललोचना
३५ ३२ कुत्रास्ते केन वानीता प्रिया मे प्रियदर्शना ३३ शबर्युवाच देव जानासि स
र्वज्ञ सर्वं त्वं विश्वभावन तथापि पृच्छसे यन्मां लोकाननुसृतः प्रभो ३४ ततोऽ
हमभिधास्यामि सीता यत्राऽधुनास्थिता रावणेन हृता सीता लंकायां वर्त
तेऽधुना ३५ इतः समीपे रामास्ते पंपानाम सरोवरं ऋष्यमूकगिरिर्नामतः
त्समीपे महानगः ३६ चतुर्भिर्मंत्रिभिः सार्धं सुग्रीवो वानराधिपः नीतभी
तः सदा तत्र तिष्ठत्यतुलविक्रमः ३७ वालिनश्च भयाद्भ्रातुस्तदगम्यमृष
र्नेयात् वालिनस्तत्र गच्छ त्वं तेन सख्यं कुरु प्रभो ३८ सुग्रीवेण स सर्वं ते ३५
कार्यं संपादयिष्यति अहमग्निं प्रवेक्ष्यामि तवाग्रे रघुनंदन ३९ मुहूर्तं ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आ॰रा॰१० ष्ट्वा राजेंद्र यावद्दग्ध्वा कलेवरं यास्यामि भगवन्राम तव विष्णोः परंपदं ४० इति
३६ रामं समाभाष्य प्रविवेश हुताशनं क्षणान्निर्धूतसकलमविद्याकृतबंधनं ४१
रामप्रसादाच्छबरी मोक्षं प्रापातिदुर्लभं किं दुर्लभं जगन्नाथे श्रीरामे भक्तवत्स
ले ४२ प्रसन्नेऽधमजन्मापि शबरी मुक्तिमाप सा किं पुनर्ब्राह्मणा मुख्याः पुण्याः
श्रीरामचिंतकाः मुक्तिं यांतीति तद्भक्तिर्मुक्तिरेव न संशयः ४३ भक्तिर्मुक्तिँधा वि
यिनी भगवतः श्रीरामचंद्रस्य हे लोकाः कामदुघांघ्रिपद्मयुगलं सेवध्वमत्यु
त्सुकाः नानाज्ञानविशेषमंत्रविततिं त्यक्त्वा सुदूरे भृशं रामं श्यामतनुं स्म
रारिहृदये भांतं भजध्वं बुधाः ४४ ॥ इति श्रीमदध्यात्मरामायणे उमामहे
श्वरसंवादे अरण्यकांडे दशमः सर्गः १० कांडेऽरण्येऽध्यात्माख्ये सर्गा द्वि ३६
पंचपरिक्षिप्ताः पंचशतानि श्लोकाः पापहराः पार्वतीशोक्ताः १ ॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।।अरंण्य काउ समाप्तः।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=13.07.20 15:06
,TRANSFERRED=2020/07/13 at 15:16:04
,PAGES=73
,TYPE=STD
,NAME=S0003299
,Book Name=M-2500-RAMAYAN AARANAYKAND
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection